दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah

e-Sanskritnewspaper

नवा प्रेरणा नवोत्साहः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-7

1

07.11.2024 गुरुवासरः वि.सं. २०८१ कार्तिकशुक्लषष्ठी कार्तिक 22 प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## डोनाल्डट्रम्पः अमेरिकायाः राष्ट्रपतिनिर्वाचने विजयं प्राप्तवान्



हिमसंस्कृतवार्ताः। अमरेकायाः राष्ट्रपति-पदाय निर्वाचनस्य परिणामः आगतः। डोनाल्ड ट्रम्पः निर्वाचनेऽस्मिन् विजयम् अधिगतवान्। परिवर्तमानस्य परिदृश्यस्य संकेतस्य सम्प्रापणानन्तरं कमला हैरिसः हावर्ड विश्वविद्यालये स्वीयं संबोधनं निरस्तं कृतवती। ट्रम्पस्य प्राप्तानां मतानां संख्या विजयाय आवश्यकं सप्तत्युत्तर-द्वशितं संख्यातः अग्रे अस्ति। डोनल्ड ट्रम्पेण द्वितीय- कार्यकाले अमरीकां सुदृढीकर्तुमनेकेषां परिवर्तनानां संकेतः प्रदतः।

## प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रदत्ताः शुभकामनाः

प्रधानमंत्री नरेन्द्रमोदी राष्ट्रपतिनिर्वाचनस्य विजयाय श्री डोनल्डट्रंपाय वर्धापनानि प्रदत्तवान् । एकस्मिन् सामाजिकान्तर्जालसंपुटके प्रधानमन्त्रिणा उक्तं यत् भारत-अमेरिका-रणनीतिक- सहसम्बन्धं सुदृढम् कर्तुं सः उत्सुकः अस्ति। श्री मोदी वैश्विकशान्तिं, स्थिरतां, समृद्धिं च प्रवर्धयितुं, उभयोः देशयोः जनानां हिताय मिलित्वा कार्यं कर्तुं च प्रतिबद्धतां प्रकटितवान्।

## गोवा-चलच्चित्रमहोत्सवः विंशतिः दिनाङ्के गोवायां समारप्स्यते

पञ्चपञ्चाशत्तमः अन्ताराष्ट्रिय चलचित्र महोत्सवः अस्य मासस्य विंशति दिनाङ्के गोवायां समारप्स्यते। नव-दिवसात्मके एतस्मिन् महोत्सवे फिल्मबाजार इत्याख्यस्य अष्टादशमं संस्करणं सम्मिलितं भविष्यति। यत् पञ्चविंशति दिनाङ्क यावत् प्रचलिष्यति।

## प्रसिद्धायाः लोकगायिकायाः शारदासिन्हा इत्यस्याः निधनम्

प्रसिद्धायाः लोकगायिकायाः शारदासिन्हा इत्यस्याः निधनं नवीनदिल्लीनगरे जातम् । राष्ट्रपतिः प्रधानमन्त्री च शोकं प्रकटितवन्तौ। सुप्रसिद्धायाः लोकगायिकायाः शारदासिन्हा इत्यस्याः गतरात्रौ नवीदिल्लीनगरे निधनं जातम्। सा द्विसप्तति वर्षीया आसीत्। सा राष्ट्रियराजधान्याः अखिलभारतीय आयुर्विज्ञानसंस्थायां अन्तिमं श्वासं गृहीतवती। भोजपुरी-मैथिली-लोकगीतानां कृते प्रसिद्धा शारदा सिन्हा पद्मश्री, पद्मभूषण, संगीत नाटक अकादमी आदीभिः पुरस्कारैः सम्मानिता अभवत् । राष्ट्रपतिः द्रौपदी मुर्मुः तस्याः निधने दुःखं प्रकटितवती

# नीति- आयोगेन १५ दिवसानां जलोत्सवस्य शुभारम्भः कृतः

**हिमसंस्कृतवार्ताः- डॉ. नरेन्द्रराणा सिरमौरः ।** जलसंरक्षणविषये जागरूकतां जनयितुं नीति- आयोगेन १५ दिवसीयं जलोत्सवस्य शुभारम्भः कृतः। नीति- आयोगेन उक्तं यत् २४ नवम्बरपर्यन्तं २० आकांक्षीमण्डलेषु प्रखण्डेषु च जलोत्सवः आचर्यते। जलशक्तिमन्त्रालयस्य पेयजलस्वच्छताविभागस्य राष्ट्रियजनजीवनमिशनम् अस्य आयोजनं कृतम् अस्ति। अस्मिन् कालखण्डे प्रख्यातव्यक्तिभिः स्थानीयनेतृभिः च जलबन्धनप्रतिज्ञायाः शुभारम्भः भविष्यति, जलसम्पदां विषये तथ्यात्मकसूचनां च प्रदास्यति। नीति-आयोगः जलप्रबन्धन-संरक्षण-स्थिरताः प्रति जागरूकतां संवर्धयतुं अद्यारभ्य पञ्चदश- दिवसीयं जल-उत्सवं प्रारब्धवान्। अभियानमिदं प्रधानमन्त्रिणः श्रीमोदिनः कृतसङ्कल्पनान्तर्गतम् विद्यते।




विगतवर्षे दिसम्बरमासे आयोजिते तृतीये मुख्यसचिवानां सम्मेलनावधौ नदीउत्सव इत्यस्मिन् आधारितस्य जल उत्सवस्य विचारः अपि स्थापितः । नीति- आयोगः कथितवान् यत् जल उत्सवोऽयं अद्यारभ्य चतुर्विंशतिदिनांकं यावत् विंशति आकांक्षि- जनपदेभ्यः मण्डलेभ्यश्च क्रियान्वितो भविष्यति।

## केन्द्रीयमन्त्रिमण्डलेन पीएम्-विद्यालक्ष्मी योजनायै स्वीकृतिः प्रदत्ता

हिमसंस्कृतवार्ताः। प्रशासनेन मेधावि-छात्रेभ्यः वित्तीयसाहाय्यं प्रदातुं पीएम्-विद्यालक्ष्मी योजनायै स्वीकृतिः प्रदत्ता। मन्त्रिमण्डलोपवेशने गृहीत-निर्णयानां विषये नवदिल्ल्यां वार्ताहरैः साकं सम्भाषमाणः सूचनाप्रसारणमन्त्री अश्विनी वैष्णवः सूचितवान् यत् छात्राः उच्चशिक्षाप्राप्तये सरलतया ऋणं प्राप्तुम् अर्हाः भविष्यन्ति। योजनायाः लाभं प्राप्तुं छात्राः एकीकृते आन्तर्जालिक पीएम-विद्यालक्ष्मी इत्यस्मिन् पटले आवेदनं कुर्तुं शक्ष्यन्ति ।

## शुक्रवासरे उदीयमानाय सूर्याय अर्घ्यमर्पयित्वा षष्ठीपर्वणः भविष्यति समापनम्



लोकस्य आस्थायाः महापर्व छठ् षष्ठीपर्वणि गतदिने सायंकाले खरना-विधानेन सम्पन्नः।अद्य सायं अस्तंगमिने सूर्याय, शुक्रवासरे प्रातःकाले च उदीयमानसूर्याय अर्घ्यमर्पयित्वा व्रतिणाम् पारणेन षष्ठीपर्वणः समापनं भविष्यति। इदं पर्व भेदरहितं सामाजिक-सामानतां प्रदर्शयति। अस्मिन् वर्षे विभिनेषु कारागारेषु च छठ पूजनम् क्रियते। मुजफ्फरपुररस्य खुदीराम् केन्द्रीयकारागारे केचन् कारागारबद्धाः इस्लाम-भक्ताः अपि छठ पूजनं कारागारे कुर्वन्ति ।

## विशेषरेलयानम्

तत्रैव छठपूजोत्सवम् अभिलक्ष्य रेलविभागः यात्रिणां यात्रासौकर्यार्थं विशेष-रेलयानानि प्रचालयति। गतदिनात् आरभ्य आहत्य नवदश उत्सव-सम्बद्धानि विशिष्ट रेलयानानि दिल्ली-राष्ट्रियराजधानी- क्षेत्राभ्यां देशस्य विभिन्नेभ्यः भागेभ्यः प्रचाल्यन्ते। भागलपुर-अयोध्या-गया-बलिया-पटना- सहरसा-सीतामढी-दरभंगा-कटरा-मुम्बई-नगराणां कृते एतानि रेलयानानि सञ्चाल्यन्ते ।

## सुभाषितम्

**आरम्भगुर्वी क्षयिणी क्रमेण, लघ्वी पुरा वृद्धिमती च पश्चात्।**
**दिनस्य पूर्वार्द्धपरार्द्ध-भिन्ना, छायेव मैत्री खलसज्जनानाम्॥**

अर्थात्- दुर्जन की मित्रता शुरुआत में बड़ी अच्छी होती है और क्रमशः कम होने वाली होती है। सज्जन व्यक्ति की मित्रता पहले कम और बाद में बढ़ने वाली होती है। इस प्रकार से दिन के पूर्वार्ध और परार्ध में अलग-अलग दिखने वाली छाया के जैसी दुर्जन और सज्जनों व्यक्तियों की मित्रता होती है।

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## महाराष्ट्र-झारखंड-निर्वाचनम्

झारखण्डराज्ये विधानसभा निर्वाचनस्य प्रथमचरणीय मतदानाय प्रचाराभियानं तीव्र भूतम्। रक्षामन्त्री भाजपेतिदलस्य वरिष्ठनेता च राजनाथसिंहः परह्यः रांचीनगरे लोहरदगा इत्यत्र जनसभां सम्बोधितवान्। राजनाथसिंहः झारखण्डमुक्ति मोर्चा दलस्य नेतरि मुख्यमन्त्रिणि च हेमन्तसोरेनोपरि राज्यस्य विनाशस्य आरोपं ख्यापितवान्। उक्तवान् च यत् राज्ये प्रशासन परिवर्तनस्य समयः समागतः सम्प्रति। काङ्ग्रेस दलाध्यक्षः मल्लिकार्जुनखडगे हजारीबाग स्थलस्य माण्डू क्षेत्रे इण्डी संयुतेः प्रत्याशिनां समर्थने प्रचारं कृतवान् तत्रैव वरिष्ठः झामुमोदलीयः नेता हेमन्तसोरेनः अपि राज्येऽस्मिन् नैकाः जनसभाः सम्बोधितवान्। अत्रावधौ महाराष्ट्रे अपि एकलचरणीय-विधानसभा निर्वाचनाय नैर्वाचनिक प्रचाराभियानं द्रुतगत्या विधीयते। लोकसभायां विपक्षनेता कांग्रेसदलीयः राहुलगांधी नागपुर-मुम्बई-नगरयोः प्रचारं करिष्यति

# विद्युत्मण्डलस्य कर्मचारिणाम् अभियंतृणां च प्रतिनिधिमण्डलं मुख्यमंत्रिणा सह अमिलत्, एतेषु विषयेषु अभवत् चर्चा





**हिमसंस्कृतवार्ताः - शिमला।**
हिमाचलप्रदेशविद्युत्मण्डलस्य कर्मचारिणाम् अभियंतृणां च संयुक्तमोर्चा राज्यसर्वकारेण वार्तायां आहूता। यतो हि मोर्चा-अधिकारिणः अधिकांशतः शिमलातः बहिः आसन्, अतः अस्मिन् त्वरितसमागमे केवलं ई. लोकेश ठाकुरः, हीरालालवर्मा च भागं ग्रहीतुं शक्तवन्तौ। बुधवासरे मुख्यमन्त्रिणा सह तस्य निवासस्थाने ओक ओवर इत्यत्र एषा सभा अभवत् या प्रायः अर्धहोरापर्यन्तं यावत् अभवत्।

## एतेषु विषयेषु चर्चा अभवत्

सभा अतीव सौहार्दपूर्णवातावरणे आयोजिता, मोर्चाद्वारा उद्धृतानां विषयाणां विषये विस्तरेण चर्चा कृता। संयुक्तमोर्चाद्वारा विद्युत्मण्डले समाप्तानां ५१ पदानां पुनर्विचारः, पुनर्स्थापनम् इत्यादिषु विषयेषु विस्तृतचर्चा कृता, येन मण्डले ८१ निष्कासितानां बहिः निर्गतचालकानाम् सेवाः निरन्तरं कृताः। पदानाम् उन्मूलनं प्रबन्धनस्य एकपक्षीयः निर्णयः इति मोर्चा अवदत्। सम्बद्धकार्यालयानां कार्यप्रणाली प्रभाविता भविष्यति। तस्मिन् एव काले यत्र चालकाः परित्यक्ताः आसन् तेषु कार्यालयेषु अद्यापि वाहनानि उपलभ्यन्ते। यस्य कृते चालकानां आवश्यकता भवति। एतेषु सर्वेषु विषयेषु विद्युत्मण्डलप्रबन्धनं कर्मचारिणाम् अभियंतृणां च संयुक्तमोर्चां श्रुत्वा पुनर्विचारः करणीयः इति मोर्चा आग्रहं कृतवान्।

## एते विषयाः उपस्थापिताः

मोर्चाद्वारा विद्युत्मण्डलकर्मचारिभ्यः पुरातनवृत्तेः कार्यान्वयनम् इत्यादिषु विषयेषु स्वस्य स्थितिः दृढतया प्रस्तुता। तस्मिन् एव काले संयुक्तदलेन मण्डले रिक्तपदानि तत्कालं पूरयितुम् आग्रहं कृत्वा अद्यत्वे मण्डले कर्मचारिणां अभावात् कर्मचारिणः महता अवसादेन कार्यं कुर्वन्ति इति अवदत्। तत्सह राज्यस्य विद्युत् उपभोक्तृभ्यः प्रदत्ताः सेवाः अपि प्रभाविताः सन्ति। एतदतिरिक्तं संयुक्तमोर्चा विद्युत्मण्डलस्य संचरण-उत्पादन-सम्पत्त्याः पृथक्करणस्य (पुनर्सङ्घटनस्य) अभियानस्य दृढतया विरोधं कृत्वा अद्य उक्तवान् यत् विद्युत्-मण्डलस्य २०१० वर्षात् पूर्वं निर्मितस्य संचरण-उत्पादनस्य, वितरणस्य च संरचनां एकीकृत्य स्थापयित्वा हानिः भविष्यति। राज्यम् अद्य स्वल्पमूल्यीयविद्युत्रूपेण जनसमुदायस्य लाभः प्राप्यते। विद्युत्मण्डलस्य संरचनां पृथक् कृत्वा राज्यस्य जनाः महता दरेन विद्युत् प्राप्नुयुः।

## ७ नवम्बर दिनाङ्के कुल्लू-मण्डले अधिवेशनं सभा च

मुख्यमन्त्री विद्युत्मण्डलप्रबन्धनाय अपि निर्देशं दत्तवान् यत् नवम्बर ११ दिनाङ्के संयुक्तमोर्चा अधिकारिभिः सह गोष्ठीं कृत्वा चर्चाकृतविषयेषु स्वविचाराः सर्वकारे प्रस्तुताः भवेयुः। प्रबन्धनवर्गेण सह समागमानन्तरं एते विषयाः सकारात्मकप्रस्तावाः च उत्थापिताः भविष्यन्ति, सर्वकारः तेषु विचारं करिष्यति इति मोर्चायाः नेतारः आशां प्रकटितवन्तः। तस्मिन् एव काले मोर्चा-संस्थायाः एतेषु विषयेषु श्वः नवम्बर-मासस्य ७ दिनाङ्के कुल्लूमण्डले सम्मेलनस्य, सभायाः च आयोजनं कृतम् आसीत्, यत् निर्धारितसमये भविष्यति यस्मिन् शतशः कर्मचारिणः, अभियन्तारः, पेन्शनभोक्तारः च भागं गृह्णन्ति ।

# हिमाचलप्रदेशकाङ्ग्रेस-समितेः विघटनम्


Phone: (O): 011-23019320
011-23019080
E-mail: kcvenugopal.org@gmail.com
kcvenugopal.in@gmail.com
Website: www.inc.in

ALL INDIA CONGRESS COMMITTEE

K.C. Venugopal, M.P.
General Secretary

24, AKBAR ROAD,
NEW DELHI-110 011

6th November 2024

PRESS RELEASE

Hon'ble Congress President has approved the proposal to dissolve the entire state unit of the PCC, District Presidents and Block Congress Committees of Himachal Pradesh Congress Committee, with immediate effect.

K.C. Venugopal

हिमसंस्कृतवार्ताः - शिमला। काङ्ग्रेसदलस्य शीर्षनेतृत्वेन हिमाचलप्रदेश काङ्ग्रेससमितेः, जिलासमितीनां तथा खण्डकाङ्ग्रेस समितीनां सम्पूर्णराज्यपदाधिकारीणां च तत्कालप्रभावेन विघटनमं कृतम्। यस्य अधिसूचना काङ्ग्रेसेन प्रसारिता अस्ति। अवधेयं वर्तते यत् हिमाचलकाङ्ग्रेसस्य अध्यक्षा प्रतिभासिंह शीर्षनेतृत्वाय पत्रं लिखित्वा पुरातनकार्यकारिणीं विघट्य नूतनकार्यकारिणीं निर्मातुं अनुमोदनं याचितवती आसीत्। प्रतिभासिंह सङ्घटनस्य निष्क्रियपदाधिकारिणां स्थाने नूतनाः नियुक्त्यः कर्तुं शीर्षनेतृत्वात् अधिकारं याचितवती आसीत् ।

# बलद्वाड़ाक्षेत्रस्य पुत्री नव्या राष्ट्रीयबास्केटबॉल इति प्रतियोगितायां छत्तीसगढ़े क्रीडिष्यति



**हिमसंस्कृतवार्ताः - अमरनाथ शास्त्री।**
बलद्वाड़ाक्षेत्रस्य श्रीमती शैलबाला- राजकीय आदर्श-वरिष्ठ- माध्यमिक- विद्यालयस्य मेधावीछात्रायाः नव्यायाः अन्तः -१४ राष्ट्रीयस्तरस्य बास्केटबॉल-प्रतियोगितायै चयनं कृतम्। नव्या स्वस्य परिश्रमेण, समर्पणेन च एताम् उपलब्धिम् अवाप्तवती, येन विद्यालयस्य, अभिभावकानां, क्षेत्रस्य जनानां च मध्ये गौरवस्य वातावरणं निर्मितम् अस्ति। अस्मिन् अवसरे विद्यालयस्य प्रधानाध्यापिका शकुन्तलाठाकुरः क्रीडाशिक्षकः दिनेशकुमारः च नव्यायाः उज्जवलभविष्यम् अकामयताम्। नव्यायाः एषा सफलता अन्येषां छात्राणां कृते प्रेरणादायिनी भविष्यति इति प्रधानाचार्या अवदत्। नव्या मण्डल- राज्यस्तरस्य स्पर्धासु उत्कृष्टतां सिद्धवती अधुना राष्ट्रियस्तरस्य स्पर्धायां हिमाचलस्य प्रतिनिधित्वं करिष्यति।

# सहकारीसमितिषु पारदर्शिता वर्धयिष्यते सर्वकारः - उपमुख्यमंत्री मुकेश अग्निहोत्री



**हिमसंस्कृतवार्ताः - शिमला।**
उपमुख्यमन्त्री मुकेश अग्निहोत्री सहकारीसंस्थानां सम्पूर्णं कम्प्यूटरीकरणं क्रियते इति उक्तवान्। प्रथमचरणस्य प्रायः ८७० समितिनां सङ्गणकीकरणस्य कार्यं सम्पन्नम् अस्ति, एतेन पारदर्शिता वर्धते, कस्यापि प्रकारस्य अनियमिततायाः सम्भावना च निवृत्ता भविष्यति। सः अवदत् यत् हिमाचलप्रदेशः देशस्य प्रथमं राज्यं यत् प्राथमिकतारूपेण समितिनां सङ्गणकीकरणस्य कार्यं सम्पन्नं कृतवान्। उपमुख्यमन्त्री मुकेश अग्निहोत्री सहकारीविभागस्य समीक्षासभायाः अध्यक्षतां कुर्वन् आसीत्। सः विभागसम्बद्धेषु महत्त्वपूर्णविषयेषु अधिकारिभिः सह विस्तरेण चर्चां कृतवान्, सहकारीसंस्थानां च सुदृढीकरणाय, तेषाम् आधारभूतसंरचनानां विकासाय च आवश्यकान् निर्देशान् अपि दत्तवान्। उपमुख्यमन्त्री उक्तवान् यत् राज्यसर्वकारः सहकारीसंस्थानां सशक्तीकरणाय दृढतया कार्यं कुर्वन् अस्ति।

अस्मिन् दिशि विभागेन बहवः उपक्रमाः क्रियन्ते। सः अवदत् यत् अर्थव्यवस्थायाः सुदृढीकरणाय सहकार्यं महत्त्वपूर्णः आधारः अस्ति। सः अवदत् यत् हिमाचलप्रदेशः सर्वदा सहकार्यक्षेत्रे अग्रणीभूमिकां निर्वहति। सः अवदत् यत् राज्यस्य बहवः सहकारीसंस्थाः प्रशंसनीयं कार्यं कुर्वन्ति तथा च ग्रामीण- अर्थव्यवस्थायाः सुदृढीकरणस्य अतिरिक्तं महिलासशक्तिकरणे अपि महत्त्वपूर्णां भूमिकां निर्वहन्ति। अस्मिन्नवसरे सहकारिता सचिवः सी. पलारासु, रजिस्ट्रार डॉ. राजकृष्ण पृथ्वी आदयः अधिकारिणः उपस्थिता आसन्।

# अन्ताराष्ट्रीयसंस्कृत-ओलम्पियाड-स्पर्धायां बिजनढलवान-विद्यालयस्य संस्कृतशिक्षकः मनोजकुमारशैलः राष्ट्रियस्तरस्य तृतीयं पुरस्कारं प्राप्तवान्



डॉ.मनोजशैलः, प्रदेशाध्यक्षः हि.रा.सं.शि.प

हिमसंस्कृतवार्ताः- लघ्वीकाशी मण्डी। अन्ताराष्ट्रीयसंस्कृत- ओलम्पियाड- ऑनलाइनपरीक्षा केन्द्रीय- संस्कृत- विश्वविद्यालयेन, नवीदिल्लीद्वारा २४-२५ सितम्बरदिनाङ्के विद्यालयमहाविद्यालयछात्राणां सामाजिकसमूहानां च कृते विभिन्नस्तरेषु आयोजिता। यस्मिन् देशस्य सर्वेभ्यः सहस्रशः छात्राः समाजसेवकाः च भागं गृहीतवन्तः। एषा प्रतियोगिता छात्राणां कृते चतुर्षु स्तरेषु आयोजिता आसीत्। बाल्यस्तरः षष्ठीतः अष्टमीपर्यन्तं, किशोरस्तरः ९ कक्षातः १२ पर्यन्तं, युवास्तरः महाविद्यालयस्तरे, प्रौढस्तरः स्नातकोत्तरस्तरे च। तथैव सामाजिकानां कृते सरलस्तरस्य उन्नतस्तरस्य च द्वयोः स्तरयोः आयोजनं कृतम् आसीत्। अस्याः अन्ताराष्ट्रीय- संस्कृत- ओलम्पियाड ऑनलाइन- परीक्षायाः परिणामः केन्द्रीय- संस्कृत- विश्वविद्यालयेन नवम्बर्-मासस्य ५ दिनाङ्के घोषितः। यस्यां मण्डीजनपदस्य बिजनढलवाने राजकीय- उच्च- विद्यालये सेवारतः संस्कृतशिक्षकः डॉ. मनोजकुमारशैलः सामाजिक- स्तरीय- प्रतियोगितायाः सरलस्तरे राष्ट्रीयस्तरे तृतीयपुरस्कारं प्राप्तवान्। सः हिमाचलतः एकमात्रशिक्षकः अस्ति यः एतत् पुरस्कारं प्राप्तवान्। पुरस्काररूपेण तेभ्यः प्रमाणपत्रं, केन्द्रीयसंस्कृतविश्वविद्यालयेन ५०००/- रूप्यकाणां नगदपुरस्कारः च दीयते।

## संस्कृत-ओलम्पियाड-स्पर्धायाः बालस्तरे मुस्कान राज्यस्तरे प्रथमा



अस्याम् अन्ताराष्ट्रीयसंस्कृत- ओलम्पियाड- स्पर्धायां बालस्तरस्य किशोरस्तरस्य च राजकीय- उच्चविद्यालयस्य १२ छात्राः अपि भागं गृहीतवन्तः। बालस्तरस्य स्पर्धायां अस्यैव विद्यालयस्य सप्तमश्रेण्याः छात्रा मुस्कान राज्यस्तरस्य प्रथमपुरस्कारं प्राप्नोत्। अनेनैव बालस्तरे विद्यालयस्य छात्राः ईशानः एवं गुंजन च श्रेष्ठप्रदर्शनं कृत्वा विद्यालयस्तरे द्वितीयं एवं तृतीयं स्थानं तथा किशोरस्तरे विद्यालयस्य छात्राः विद्यालयस्तरे प्रिया, गौरवः एवं यामिनी क्रमशः प्रथमं द्वितीयं तृतीयं स्थानं प्राप्नुवन्। बिजन-ढलवानस्य राजकीय- उच्चविद्यालयस्य मुख्याध्यापिका मोनिकाठाकुर छात्राणां कृते एतस्यै उपलब्ध्यै शुभकामनाः अयच्छत्। अन्ताराष्ट्रीयसंस्कृत- ओलम्पियाड- स्पर्धायां राष्ट्रियस्तरस्य स्थानं प्राप्ते विद्यालयस्य शिक्षकाय मनोजकुमारशैलाय अपि शुभाशंसाः अददत्। सा अवदत् यत् विद्यालयस्य संस्कृतशिक्षकः मनोजकुमारः शिक्षया सह संस्कृतसम्बद्धेषु सर्वेषु कार्येषु सक्रियरूपेण भागं गृह्णाति, छात्रान् च प्रेरयति। फलतः अद्य विद्यालयस्य छात्राः राज्यस्तरीय- प्रतियोगितासु, अन्ताराष्ट्रीय- संस्कृत- ओलम्पियाड-स्पर्धासु च भागं गृह्णन्ति।

## उपनिदेशकेन कृतम् अभिनदनम्

मण्डीजनपदस्य प्रारम्भिकशिक्षा-उपनिदेशकः विजयकुमारः गुप्ता राष्ट्रीयस्तरे तृतीयपुरस्कारस्य प्राप्त्यर्थं बिजन-ढलवानस्य राजकीय- उच्चविद्यालयस्य शिक्षकस्य मनोजकुमारशैलस्य अभिनदनं कृतवान्। सः अवदत् यत् एतत् मण्डीमण्डलस्य कृते गौरवस्य विषयः अस्ति। डॉ. मनोजकुमारशैलः संस्कृतक्षेत्रे प्रत्येकस्मिन् कार्ये सदैव अग्रणी अस्ति तथा च विद्यालयस्तरस्य संस्कृतभाषायां प्रार्थनासभायाः आरम्भे अपि तस्य प्रयत्नाः प्रशंसनीयाः अभवन्।

# यशोवर्धनः १० दिवसेषु त्रिवारं पदकं प्राप्तवान्, राज्यविजेता अभवत्; १० वर्षेभ्यः आरभ्य योगाभ्यासं करोति



हिमसंस्कृतवार्ताः - हमीरपुरम्। हिमाचलप्रदेश-योगासनक्रीडासङ्घद्वारा शिमलानगरे आयोजितायां राज्यस्तरीय- योगासनस्पर्धायां अण्डर-१८ वर्गे स्वर्णपदकं जित्वा यशोवर्धन अत्रि राज्यविजेता अभवत्। १० दिवसेषु सः राज्यस्य राष्ट्रियस्तरस्य च त्रयाणां स्पर्धासु तेजस्वी प्रदर्शनं कृतवान्। हमीरपुरस्य हिम एकेडमी विद्यालयस्य छात्रः यशोवर्धनः अत्रि केवलं १५ वर्षेषु एव मण्डलाय राज्याय च गौरवम् आनयत्। यशोवर्धनेन १० दिवसेषु त्रिवारं स्वस्य मण्डलं, राज्यं तथा च अभिभावकान्, प्रशिक्षकान्, शिक्षकान् च गौरवपूर्णं कृतम्। यशोवर्धन अत्रि 22 तः 25 अक्तूबर पर्यन्तं सुन्दरनगरे आयोजितायां अण्डर-१९ राज्यस्तरीय योगप्रतियोगितायां व्यक्तिगत स्पर्धायां स्वर्णपदकं जित्वा मण्डले गौरवम् आनयत्।

तस्मिन् एव काले भारतस्य योगसङ्घेन ऊनायां २४तः २७ अक्तूबर पर्यन्तं ४९ तमे उपजूनियर- राष्ट्रीय- योग-क्रीडाप्रतियोगितायां अण्डर-१६ प्रतियोगितायां कांस्यपदकं प्राप्तवान्। अधुना सः हिमाचलप्रदेशयोगासनक्रीडासङ्घेन चतुर्थे नवम्बर दिनाङ्के शिमलानगरे आयोजितायां राज्यविजेतायां १८ वर्षाभ्यन्तरवर्गे स्वर्णपदकं प्राप्तवान्। यशोवर्धनः १० वर्षेभ्यः योगेन सह सम्बद्धः अस्ति। सः पूर्वं स्वस्य आयुवर्गे बहुवारं राज्ये पदकानि प्राप्तवान् अस्ति।

# मण्डी जनपदस्तरीयाणां ऊनविंशाधोवयसः छात्राणां सांस्कृतिकप्रतियोगितानां भव्यसमापनम्



नवम्बरमासस्य पञ्चमे दिनाङ्के ऊनविंशाधोवयसः छात्राणां सांस्कृतिकप्रतियोगितानां समापनं रा. व . मा.पाठशाला गुम्मा नामकं स्थाने अभवत् । अत्र जिलास्तरीय १९ छात्राणां ,यथा गीत, नृत्य, नाटकादिषु क्रियाकलापानां उद्घाटनसमारम्भे श्री जीवनलाल ठाकुर : महा सचिवः काग्रेसदलं मुख्यातिथिः रुपेणोपस्थितः । विद्यालयस्य प्रधानाचार्यः श्री ललितः धरलोचः आयोजनस्य सभापतिः आसीत्। क्षेत्रस्य विभिन्नानां सांस्कृतिकक्रियाकलापानां आयोजनं सफलतया सम्पन्नम्। षष्ठे दिनाङ्के मण्डीजनपदः उपशिक्षानिदेशकः सुशीलकुमारः शर्मा अध्यक्षतां कृतवान्। लोकसंस्कृतेः लोकसुप्रसिद्धः गायकः करनैलराणा अपि अस्मिन्नावसरे उपस्थितः। लोकसंस्कृतेः संर्वधनाय विद्यालये प्रचलितानां गीतानां, लोकनृत्यानां, भजनानां च प्रदर्शनं कृतवान, उपनिदेशकः श्री सुशीलकुमारशर्मा छात्रान् लोकसंस्कृतेः संरक्षणस्य विषये प्रेरितवान्।

# हिमाचले राज्यस्य औषधनियन्त्रणप्राधिकरणेन औषधनिर्माणे गुणवत्तायाः विषये प्रवादं कुर्वतां १३ औषधोद्योगानाम् उपरि प्रतिबन्धः स्थापितः

हिमाचले राज्यस्य औषधनियन्त्रणप्राधिकरणेन औषधनिर्माणे गुणवत्तायाः विषये प्रवादं कुर्वतां १३ औषधोद्योगानाम् उपरि पाशं कठिनं कृत्वा औषधनिर्माणे प्रतिबन्धः कृतः। औषधोद्योगेषु निर्धारितौषधनिर्माणनियमानां मानकानां च अनुपालनस्य कारणेन प्राधिकरणेन एषा प्रमुखा कार्यप्रकिया कृता । वयं भवन्तं वदामः यत् केन्द्रीय औषधमानकनियन्त्रणसङ्गठनेन (CDSCO) राज्यस्य औषधनियन्त्रणप्राधिकरणेन च चिह्नितेषु औषधनिर्माण-एककेषु जोखिम-आधारित-निरीक्षणं क्रियते। अस्मिन् श्रृङ्खलायां मे मासात् अधुना यावत् सोलन, सिरमौर, उना, काङ्ग्रा च जनपदेषु प्रायः ४२ औषधनिर्माण-एककानां निरीक्षणं कृतम् अस्ति, येषु १३ औषधोद्योगेषु प्रवादं ज्ञात्वा राज्य-औषध-नियन्त्रण-प्राधिकरणेन सप्त-एककानि पिहितानि सन्ति। तत्कालप्रभावेण उद्योगेषु उत्पादनं पूर्णतया प्रतिबन्धयितुं षट् उद्योगेषु उत्पादनस्य आंशिकप्रतिबन्धं च कर्तुं आदेशाः निर्गताः। यथा यथा उपर्युक्ताः उद्योगाः न्यूनतां दूरीकरोति तथा तथा तेषां संयुक्तनिरीक्षणानन्तरम् उत्पादनं आरभ्यत इति अनुमतिः भविष्यति।

# धारावाहिकं गीताप्रश्नोत्तरम् -८०



अर्जुनः - अस्तु, भगवन् ! परं तज्ज्ञाननेत्रं कस्य प्रकाशते, कस्य च नैव प्रकाशते ?

श्रीकृष्णः - हे भारत ! यैः मनुष्यैः स्वकीयम् अन्तःकरणं स्वच्छीकृतमस्ति, अर्थात् शोधितमस्ति, उताहो नित्यप्राप्ततत्त्वम् आदृतमस्ति, एतादृशाः यत्नशीलाः योगिनः आत्मनि स्थितं तत्त्वं जानन्ति, अर्थात् तेषां ज्ञाननेत्रं प्रकाशते । परन्तु यैः स्वकीयम् अन्तःकरणं न शोधितम् अर्थात् स्वतःप्राप्तविवेकः न आदृतः, एतादृशाः अविवेकिनः यतमानाः सन्तोऽपि तत्त्वमिदं न जानन्ति, अर्थात् तेषां ज्ञाननेत्रं न प्रकाशते, न उद्घटते वा ।

अर्जुनः - भगवन् ! त्वया यत् आत्मनि स्थितं तत्त्वम् उक्तं, वस्तुतः तत् किम् ?

श्रीकृष्णः - अर्जुन ! तत् तत्त्वं तु अहमेव अस्मि, अर्थात् मामेव विद्धि । सूर्यगतं यत् तेजः तत् अखिलं जगत् प्रकाशयति, यत् तेजः चन्द्रमसि, अग्नौ च विद्यते, तत् तेजः नापरस्य कस्यापि स्यात्, अपितु ममैव वर्तते । अर्थात् अहमेव सूर्ये, चन्द्रमसि, अग्नौ च तेजोरूपेण स्थितः सन् सर्वं जगत् प्रकाशयामि ।

अर्जुनः - तव अन्यत् किं कार्यं स्यात् भगवन् ?

श्रीकृष्णः - शृणु पार्थ ! पृथिव्याम् आविश्य स्वबलेन सर्वान् प्राणिनः धारयामि । रसमयः चन्द्रमाः च भूत्वा सर्वाः ओषधीः पुष्णामि ।

अर्जुनः - अन्यच्च किं करोषि भगवन् ?

श्रीकृष्णः - पार्थ ! समस्तप्राणिनां शरीरस्थितः सन् अहमेव प्राणापानसमायुक्तः वैश्वानरः अर्थात् जठराग्निः भूत्वा तैः आश्रितं भोज्य-पेय-चोष्य-लेह्यरूपं चतुर्विधम् अन्नं पचामि ।

अर्जुनः - विलक्षणता अन्यापि तव का स्याद् भगवन् ?

श्रीकृष्णः - मम विलक्षणताः अनन्ताः एव स्युः अर्जुन ? तत्सर्वमत्र वक्तुं कथं वा शक्नुयाम् ? तथापि काश्चित् मद्विशेषताः शृणु पार्थ ! अहमेव सर्वेषां प्राणिनां हृद्देशे निवसामि । मत्तः एव तेषु स्मृतिर्ज्ञानम् अपोहनञ्च भवति अर्थात् संशयादिदोषाणां नाशः भवति । सर्वैः वेदैः अहमेव वेद्योऽस्मि । वेदतत्त्वस्य निर्णायकः, ज्ञाता च अहमेव अस्मीति एवं जानीहि भारत ! (गीता -१५/११-१५)

(अनुवर्तिष्यते) -- नारदोपाध्यायः ।

## " लौकिकन्यायकोशः " ( ८९ )

## " बहुसपत्नीकन्यायः "

एकस्य पुरुषस्य यदि बहव्यः पत्न्यः भवेयुस्तदा सः एकामपि आनन्दयितुं न शक्नुयात् । दुःखमेव प्राप्नुयात् । इन्द्रियासक्तः अपि तथा सर्वाणि इन्द्रियाणि तर्पयितुं न शक्नुयात् ।

यथा---- बहव्यः सपत्न्यः इव गेहपतिं लुनन्ति । ( भागवते )

डा. वर्षा प्रकाश टोणगांवकरः महाराष्ट्रम

# उत्तरतमिलनाडू मध्ये संस्कृत-भारत्याः बालोत्सवाः चलन्ति

संस्कृतभारती उत्तरतमिलनाडू मध्ये बालोत्सवाः चलन्ति। स्पर्धा रूपेण भवन्ति। इमे कार्यक्रमाः 2012 तमात् वर्षात् निरन्तरम् चलन्ति दिनत्रयात्मककार्यक्रमाः। कार्यक्रमेषु बालोत्सवः,युवोत्सवः,सामजिकोत्सवः आयोज्यन्ते। अधिकाः सन्ति इति कारणेन प्रादेशिकस्थरे चलति। दशस्थानेषु 4000 (400×10) बालाः भागं कुर्वन्ति। रूपकानि, सम्भाषणप्रदर्शनानि ,एकपत्राभिनायानम्,कथा कालक्षेपः, वाग्भूषणानि, सामूहिकगीतानि,प्रश्नोत्तरी कथाकथनम्, मध्यस्थरबालेभ्यः।शिशुगीतानि,वेशभूषणम् शिशुनाम् कृते भवन्ति। कार्यकर्तृणां कृते संपर्कगणः भवति।

# हास्यकणिका



## सर्वेषु प्राणिषु सर्वाधिकः प्रसिद्धः प्राणी कः अस्ति - जानन्ति किम्?

*हास्यकणिका विशेषज्ञा- विदुषी अग्रवाल*
*प्रेरणास्रोतः- महाभागः महेन्द्रमिश्रमहोदयः*

सामान्यतः, जनानाम् एकः अथवा द्वौ अथवा अधिकं अधिकः त्रयः चत्वारः च नामानि सन्ति।
परञ्च गर्दभस्य तु केवलं संस्कृते द्वाविंशतिः नामानि भवन्ति - कियत् प्रसिद्धः प्राणी 😬 🤣 😅 😍

| | |
|---|---|
| गर्दभः | गर्द्दभः |
| गन्धे | श्वेतकुसुदे |
| विडङ्गे | चक्रीवान् |
| बालेयः | रासभः |
| खरः | राशभः |
| शङ्ककर्णः | भारगः |
| भूरिगमः | धूसराह्वयः |
| वेशवः | धूसरः |
| स्मरसूर्य्यः | चिरमेही |
| पशुचरिः | चारपुङ्खः |
| चारटः | ग्राम्याश्वः |




## नवीनः अदृश्यः कपटः




यदि अन्यः कोऽपि भवतः वित्तकोषे धनं स्थानान्तरयति त्रुट्या प्रेषितं धनं इति उक्त्वा सः धनं प्रत्याचते च तर्हि केवलं वदतु यत् भवान् स्वस्य वित्तकोषं गत्वा दोषेण प्रेषितं धनं पुनः प्राप्तुम् अभ्यर्थनां (दावा) कुर्यात्, ततः १५-२० दिवसेषु भवान् भवतः धनं प्राप्स्यति। अधुना एषः कपटः अपि बहु प्रचलति, येन कश्चन भवतः वित्तकोषं धनं प्रेषयित्वा ततः पुनः पुनः भवन्तम् धनं प्रतिदातुम् अभ्यर्थनां (दावा) करोति। यदि भवान् धनं प्रतिदास्यति, तर्हि भवता दत्तेन धनेन सह तस्य कोषेण प्रत्यर्पितं धनमूल्यम् अपि भवतः वित्तकोेषात् न्यूनं भवेत्। तदनु सः भवतः चलितदूरध्वनिक्रमांकम् अपि अवरुद्धां करिष्यति।

अतः भवता धनस्य स्थानान्तरणस्य आवश्यकता नास्ति।
यदि कर्तव्यं तर्हि पुलिसस्य/ आरक्षकस्य समक्षः करोतु।

**जागरितः भवतु, सावधानः भवतु।**

पहाड़ी गल्लां हिमसंस्कृतवार्ताः

# बराड़ी

असांरे गांवां रिया बाटा रे कंडेह
हुन्दी थी इक्क बड्डी बराड़ी
कंडे थे डाल़ें बौहत ज़्यादा
पर बैर लगदे थे बड़े भारी

कोई पत्थर मारी कने तवारदा था
कोई गास चढ़ी जांदा था
बड़े बड़े मीठे बैरां जो
बड़े चावा कने खांदा था

बैरां पीछे हुंदे थी कई बार लड़ाई
दूजे रे हत्था ते खोई कने लैंदे थे खाई
कंडेयाँ ने फटी जांदी थी कई बार कमीज़
घरें जाई कने डोल देंदे थे लुकाई

बड़े ऊपर डाल़ा पर था इक्क टोहड
तिस बिच रहन्दा था इक्क तोतेयां रा जोड़ा
चीं चीं री आवाज औंदी थी तांजे
तां बच्चे दिसदे थे थोड़ा थोड़ा

कल़दे थे तांजे बराड़िया जो
तां बैरां रे लगदे थे थल्ले ढ़ेर
बड़े स्वादा कने खांदी थी बकरियां
लोग थल्ले बी बैठी जांदे थे देर सवेर

इक्क दिन गांवां जो बणी गई सड़क
माहणुये बराड़ीया बडणे जो देर नी लाई
तिसे जे दित्ते मीठे फल़ सारी उम्र
मिंटा च बड्डी कने दिती मुकाई

थल्ले पईरी बराड़ी करयादी थी चित्कार
कोई नी था सुणने वाल़ा तिसारी पुकार
सब मस्त थे सड़क निकल़णे री खुशिया च
टुकड़े टुकड़े करी ने नेणे जो सब बैठिरे थे त्यार




रवींद्र कुमार शर्मा
घुमारवीं
जिला बिलासपुर हि प्र

# काव्यमञ्जरी

**अहिंस्ररचनाः श्यामाः स्निग्धा ननु भयाननाः।**
**ते स्पष्टभाषकर्माणो वर्षावचनपूरकाः॥**
**विश्वासार्हास्तु नैव ते भस्मश्वेतास्तरन्ति ये।**
**आकर्षकाः सदा गत्वा प्रतीक्षां कारयन्ति ते॥**

निवेदितातिवारी-विरचितम्
मेघानुवादक-नाम्ना आङ्ग्लकाव्यम्
भाषान्तरणम् - ईदर-धीरजः

**किं तेन कमलानाम्ना न चेद्विष्णुरुपासितः।**
**ट्रम्पमेव वरं मन्ये मोदिनो यः सखाऽस्ति वै॥**

शिशुपालः

एक वर्ष क लिए लिए प्रतिदिन पाएं संस्कृत समाचार पत्र पीडीएफ , मात्र 100 रुपये
हिमसंस्कृतवार्ताः
Send screen shot of payment to
7876636263
Scan & Pay 7876636263